Shri Raghunath Temple MSS. Library,
JAMMU

No. ११२५-घ

Title रुद्रयामलतन्त्रे महाकालीप्रस्तार राजकवचं

Author

Extent ११ Age

Subject तन्त्रम्

॥ अथप्रस्तारकवचंप्रारंभपत्र ॥

श्रीम०
१

श्रीगुरवेनमः कैलाशशिखरारूढं भै
रवंचंद्रशेखरं वक्षस्थलसमासीना भै
रवीपरिपृच्छति १ श्रीभैरम्युवाच देवेश
परमेशान लोकानुग्रहकारकः कवचं
सूचितंपूर्वं किमर्थनप्रकाशितं २ य
दिमेमहतीप्रीति स्तवास्तिकुलभैरव
कवचंकालिकादेव्याः कथयस्वानुकं
पया ३ ॐश्रीगुरुभैरवउवाच अप्र
काश्यमिदंदेवि नरलोकेविशेषतः

क०
१

लज्जावारंवावारितापि स्त्रीस्वभावाद्धि
पृच्छसि ४ ॐश्रीभैरवउवाच सेवका
वहवोदेव कुलधर्मपरायणा यतस्ते
त्यक्तजीवाशा शवोपरिचितोपरि ५ ते
षांप्रयोगसिद्ध्यर्थे स्वरतार्थेविशेषतः
पृच्छामिवहुशोदेव कथयस्वदयानिधे
। ६ श्रीगुरुंभैरवउवाच कथयामिश्रृ
णुप्राज्ञे कालिकाकवचंपरं गोपि
नीयंप्रयत्नेन स्वयोनिपरतथा ॐगु

श्रीप्र०
२

ॐ अस्य श्री सर्वविद्या महाराज्ञी घोरका
लिका महादेवी कवचराजस्य श्रीगुरुं
महाकाल ऋषिरुष्णिक छंदो हैतरूपि
णी श्रीदक्षिणाकालिकादेवता हूँबी
जं ह्रीं शक्तिः क्रीं कीलकं सर्वार्थसा
धनपुरस्सर अघोराघोर महामंत्र सिद्धये
जपे विनियोगः ॐ गुरुं सहस्रारे महा
पद्मे कर्पूरधवलो गुरुः वामोरुस्थित
यादेव्याः सह सर्वत्र रक्षतु परमाख्या

क०
२

गुरुः पातु परापरगुरुस्तथा परमेष्ठीगुरुः

पातु दिव्य सिद्धः श्रमानव १० महादेवी

सदापातु महादेवस्तथावतु त्रिपुराभैर

वः पातु दिव्यरूपधरस्सदा ११ ब्रह्मानं

दः सदापातु पूर्णदेवस्तथावतु बलचित्त

सदापातु चलाचलश्च पातु मां १२ कुमा

रः क्रोधनश्चैव वरदास्मरदीपकः माया

मायावतीचैव सिद्धौघाः पातु सर्वदा १३

विमलः कुशलश्चैव भीमसेनः सुधाक
रः मीनो गोरखः लणश्चैव भोजदेवः प्र
जापतिः १४ मूलदेवो रतिदेवो विघ्ने
श्वरहुताशनः संतोषः समयानंदः पा
तुमांमानंदः सदा १५ सर्वेश्चानंदना
थांताः श्चावांतामातरः क्रमात् गणना
थः सदापातु भैरवः पातुमांसदा १६ व
टुकोमांसदापातु दुर्गोमांपरिरक्षतु शि

रसःपादपर्यंतं पातुमांघोरदक्षिणा १७।
तथाशिरसिमांकालीहृदिमूलेचरक्षतु सं
पूर्णविद्ययादेवीसदासर्वत्ररक्षतु १८ क्रीं
क्रींक्रीं वदनेपातु नेत्रेहूंहूं सदावतु कंठे
ह्रींह्रीं सदापातु हृदिदक्षिणेकालिके १९
क्रींक्रींक्रींपुरतःपातु हूंहूंमांरक्षदक्षिणे
ह्रींह्रींमांवामतोवतु पृष्ठेपातुसदास्वाहा मू
लेसर्वत्ररक्षतु २० षडंगयुवतीपातु षडंगे
षुसदैवमां मंत्रराजःसदापातु ऊर्ध्वाधो

दिग्विदिक्षु स्थितः २१ चक्रराजः स्थिता
चापिदेवतापरिपातु मां उग्रा उग्रप्रभा दीप्ता
पातु पूर्वे त्रिकोणके २२ नीलाघनावलाका
च पातु मध्ये त्रिकोणके मात्रामुद्रामिता
चैव तथापर त्रिकोणके २३ कालीकपा
लिनीकुल्ला कुरुकुल्ला विरोधिनी बहि
ष्यट्कोणगापातु विप्रचित्तातथाप्रिये २४
सर्वाः श्यामाखड्गधरा मुंडमालाविभूषि
ताः चतुर्बाहुत्रिनयना वामहस्तेनतर्जनी

ब्रांह्मीपूर्वेदलेपातु नारायणीतथाग्निके २५
माहेश्वरीदक्षिणेच चामुंडानैरृतेतथा कौ
मारीपश्चिमेपातु वायव्येचापराजिता २६ वा
राहीचोत्तरेपातु नारसिंहीशिवेवतु ऐँह्रींअ
सितांगपूर्वे भैरवः परिरक्षतु ऐँह्रींरुरुस्त्वा
ग्निकोणेभैरवः परिरक्षतु ऐँह्रीं चंडस्तुदक्षि
णेभैरवः परिरक्षतु ऐँह्रींक्रोंक्रोधोनैरृत्यां
भैरवः परिरक्षतु ऐँह्रींउन्मत्तपश्चिमे भैरवः
परिरक्षतु २८ ऐँह्रींकपालीवायव्ये भैरवः

श्रीप्र०
५
5

परिरक्षतु ऐँ ह्रीँ भीषणचोच्चरे भैरवः परि
रक्षतु ऐँ ह्रीँ संहार ईशान्यां भैरवः परिर
क्षतु मातृणामंकगाः शिवा २९ ऐँ ह्रीँ हेतु
८ वटुकभैरवः पूर्वस्मै पातु सदैव मां ऐँ ह्रीँ त्रि
पुरांतक वटुकभैरव आग्नेय्यां सर्वदावतु ३०
ऐँ ह्रीँ वन्हिवेताल वटुकभैरवः दक्षिणे पा
तु मां सदा ऐँ ह्रीँ अग्निजिह्व वटुकभैरवः नै
ऋत्यां पातु मां सदा ऐँ ह्रीँ काल वटुकभैर

क०
५

वः पश्चिमे दिशि मां सदा ३१ ऐं ह्रीं कराल
वटुकभैरवः वायव्ये पातु मां सदा ऐं ह्रीं
एकपद वटुकः भैरवः उत्तरे मां सदा तु ३२
ऐं ह्रीं भ्रामरवटुकः भैरवः पातु ईशान्यां
दिशि मां सदा ऐं ह्रीं क्लीं ह्रूं फट् स्वाहाद्याश्च
तुःषष्टीश्च मातरः ३३ ऊर्ध्वाधो दक्षवा
माग्रे पृष्ठदेशेषु पातु मां ऐं ह्रीं श्रीं श्रीं सिं
हव्याघ्रमुखी पूर्वे मां प[redacted]रिरक्षतु ३४ ऐं
ह्रीं क्रौं क्रौं कालसर्पमुखी आग्निकोणे सदा

श्रीप्र०
६

वतु ऐं ह्रीं म्रं म्रैं मृगमेषमुखी दक्षिणे मां
सदावतु ३५ ऐं ह्रीं च्यौं च्यौं गजवानिमु
खी नैऋत्यां मां सदावतु ऐं ह्रीं सैं सैं विडा
लमुखी पश्चिमे पातु मां सदा ३६ ऐं ह्रीं
रवैं रवैं उष्ट्राश्वमुखी वायुकोणे सदावतु
। ३७ ऐं ह्रीं ह्रीं लंबोदरी महोदरी शिवकोणे
सदावतु ऐं ह्रीं ह्रः ह्रः ह्रस्वजंघा तालजंघा प्र
लंबोष्ठि सदावतु ३८ एताः श्मशानवासि
न्या भीषणा विकृताननाः पातु मां सर्वदा
देव्याः सर्वदा भीष्टपूरिकाः ३९ ऐं ह्रीं पूर्वतो मां

रक्षे दाग्नेयामग्निदेवता दक्षिणेयमसदापा
तु नैऋत्सांनैऋतश्चमां ५० वरुणोवतुमां
पश्चे वायुर्मांपातुवायुके कुबेरश्चोत्तरेपातुई
शांन्यांतुसदाशिवः ५१ ऊर्द्धं ब्रह्मासदापा
तु अधश्चानंतदेवाः पूर्वादि दिक्षुस्थिता
पातु वज्राद्याश्चगणाश्चमां ५२ कालिका
पातुशिरसि हृदयेकालिकावतु दिक्षुमां
कालिकापातु विदुक्षुकालिकावतु ५३
चर्मसृङ्मांसमेदास्थि मज्जाशुक्राणिमे
वतु इंद्रीयाणिमनश्चैव देहसिद्धीश्चमेव

श्रीप्र०
७

नु ५८ आकाशात्पादपर्यंतंकालिकामेसदा
वतु विशंतंकालिकापातु पश्चिमांकालिका
वतु शयनेकालिकापातु सर्वकार्येषुकालि
का प्राणान्मेकालिकापातु दारान्मेकौलि
कौपातु पुत्रान्मेकालिकापातु धनंमेकालि
कावतु यत्रमेसंशयाविघ्ना स्तान्नाशयतु
कालिका इतिदंकवचंदेवि ब्रंह्मलोकेपि
दुर्लभं तवप्रीत्यामयाख्यातं गोपनीयंस्व०
योनिवत् तवनाम्निस्मरेदेवी सर्वयज्ञफ
लंलभेत् सर्वपापक्षयेयाति वाछांसर्वे

क०
७

त्त्रविंदति ४८ नाम्नाशतगुणंस्तोत्रं स्तोत्रात्
शतगुणोमनुः मंत्रात्सतगुणंध्यानं कवचंत
स्मात्सताधिकं शुचिसमाहितोभूत्वाभक्ति
श्रधासमन्वितः संस्थाप्यवामभागेतु शक्ति
स्वामिपरायणां रक्तवस्त्रपरिधानां शिवमंत्र
धरांशुभां याशक्तिःसामहादेवि शिवरूपश्च
साधकः अन्योन्यचिंतयेद्देवि देवत्वमुपजा
यतेशक्तियुक्तोयजेन्मंत्री चक्रेवामनसा
पिवा भोगैश्चमधुपर्काद्यैः स्तांवुलैश्चसुवा
सितैः ततस्तुकवचंदिव्यं पठेदेकमनाःप्रिये

तस्मात्सर्वार्थसिद्धिःस्या न्नात्रकार्या विचार
णा इदंरहस्यंपरमंपरंस्वस्त्ययनंमहत् यःस
कृत्पठतेदेवि शृणुयाद्वासमाहितः सर्वा
सलाभतेकामान् परेदेवीपुरंव्रजेत् ५५ स
कृद्यस्तुपठेद्देवि कवचंदेवदुर्लभं ▒ सर्व
यज्ञफलंतस्य भवेदेवनसंशयः ५६ संग्रा
मेषुजयेच्छत्रून्मातंगानिवकेशरी नास्त्राणि
तस्यशस्त्राणि शरीरेप्रभवंतिवै ५७ तस्य
व्याधिःकदाचिन्न दुःखंनास्तिकदाचन ग
तिस्तस्यैवसर्वत्र वायुतुल्यःसदाभवेत् ५८

दीर्घायुःकामभोगीशो गुरुभक्तो भवेत्सदा
महाकवचमाहात्म्यं पठमान्नित्यमानसः ५९
विनापियोगचर्येण योगिनांसमतांव्रजेत् भू
र्यत्वचिसमालिख्य चक्रंतत्रविनिर्मितं ६०
मध्यत्रिकोणंसंलिख्य साध्यसाधकयोर्लि
पिं उद्धरेन्मूलमंत्रंच मातृकार्णैविचेष्टये
यत् ६१ मधुमिश्रेणचेंद्रेणचंदनाभ्यांच
सुंदरी यतद्यंत्रंमहादेवि सुरासुरसुदुर्ल
भं गोरोचनकुंकुमेन त्वचाद्यकवचंलिखे
त् स्वतसूत्रेणसंवेष्ट्य लालयापरिमंडये

येत् ६३ पंचामृतैः पंचगव्यैः स्नापयित्वा
शुभेहनि संपूज्य देवतारूपं गुटिकांसर्व
कामिदां ६४ प्राणप्रतिष्ठामंत्रेण प्राणांस्त
त्र नियोजयेत् अंतर्योतिं ततो ध्यात्वा तत्र
संस्थापयेद्बुधः ६५ एशालुगटिकादेविक
ठेलग्नाखिलप्रदा शीर्षे वश्यकरीदेवी ना
भौस्तंभनकारिणी ६६ वध्वावामभुजेह्यषा
वैरीपक्षक्षयंकरी जठरेरोगदमनी पुत्रदा
हृदिसंस्थिता ६७ विद्याकरीललाटस्था
शिखायांतुयशःप्रदा सर्वकामप्रदादेवी।

सर्वरोगक्षयंकरी दक्षिणेबाहुमूलेवै यदितिष्ठतिसर्वदा तदासर्वार्थसिद्धिःस्यात्सद्यन्मनःसिवर्त्तते ६९ आहातुकवचस्यास्य पठेनोद्धारणात्प्रिये सर्वान्कामान्नवाप्नोति तवस्नेहात्प्रकाशितं ७० गुरुःपादप्रसादेन सद्विद्यायदिलभ्यते तथैवकवचंदेवि त्रिषुलोकेषुदुर्ल्लभं ७१ सचदेवोहरःसाक्षात् तस्तत्रोपरमेश्वरी यस्यभक्तिर्गुरौनित्यं वर्त्ततेदेववत्प्रिये ७२ तदामंत्रस्ययंत्रस्य सिद्धिर्भवतिनान्यथा कवचस्यतथासिद्धि गुटिकायाश्चसुंदरि

श्रीकं०
२०

१७३ अज्ञात्वाकवचंदेवि नदद्याद्गुरुपादुका
नू नफलसमवाप्नोति परेचनरकंव्रजेत् ७४
सत्यंसत्यंपुनःसत्यं सत्यंसत्यंपुनःपुनः नशक्नो
तिप्रभावंतु कवचस्यास्यवर्णितुं ७५ यस्मैक
नदातव्यं कवचंदेविदुर्लभं नदेयंपरशिष्येभ्यः
रूपणेभ्यश्च सुंदरि ७६ शिष्यायभक्तिहीनाय
लुब्धकायतथैवच गुरुभक्तिविहिनायप
रदाररतायच ७७ निंदिकायकुशीलाय दांभिका
यचसुंदरी यादद्दातिनिषिद्धेभ्यः कवचंमन्मुखो
दितं तस्यनश्यंतिच शिवेविद्यायुर्धनसंचयाः
देयंशिष्यायशांताय गुरुभक्तिरतायच सर्व

लक्षणायुक्ताय तंत्रमंत्रपरायच इतिश्रीघो
रकालीप्रस्तावेउत्तरतंत्रेरुद्रयामले भैरवभै
रविसंवादे श्रीमहाकालिकाया प्रस्ताररराज
कवचंसंपूर्णम् ॥ अथसंक्षेपकवचंप्रारभः